ALLEN

# SAMPLE PAPER

Subject - Sanskrit

Class - X

Time : 2.30 Hrs | Maximum Marks: 80

(खण्ड–'अ')

प्रश्न 1. वस्तुनिष्ठ प्रश्नाः – (17)

(1) अद्य धरातलं कीदृशं जातम्?
(अ) निर्मलम् (ब) शुद्धम् (स) पवित्रम् (द) समलम्
(2) 'जननी तुल्यवत्सला' इति पाठः महाभारतस्य कस्मात् पर्वणः उद्धृतः?
(अ) विराट् पर्वण (ब) भीष्मपर्वणः (स) वनपर्वणः (द) कर्णपर्वणः
(3) किं कृत्वा मनुष्यः नावसीदति?
(अ) युद्धम् (ब) धनार्जनं (स) तपः (द) उद्यमं
(4) काकचेष्टः विद्यार्थी कीदृशः छात्रः मन्यते?
(अ) मूर्खः (ब) आदर्शः (स) कातरः (द) पण्डितः
(5) कस्य समक्षमद्यापि मानवः वामनकल्प एव?
(अ) भूपम्पस्य (ब) समुद्रस्य (स) भगवतः (द) प्रकृतेः
(6) अम्भोदाः कुत्र सन्ति?
(अ) नगरे (ब) वने (स) गगने (द) पर्वते
(7) न्यायधीशः शवमानेतुमादिष्टवान्–
(अ) गृहे (ब) न्यायलये (स) कार्यालये (द) अन्यत्र
(8) 'सच्चरित्रम्' इत्यस्य पदस्य संधिविच्छोऽस्ति–
(अ) सत् + चरित्रम् (ब) सद् + चरित्रम् (स) सस् + चरित्रम् (द) स + चरित्रम्
(9) वृक्षाद् + पतति इत्यस्य संधिपदमस्ति।
(अ) वृक्षाद् पतति (ब) वृक्षात्पतति (स) वृक्षात्पतती (द) वृक्षात्पततिः
(10) जश्त्व संधे उदाहरणमस्ति–
(अ) पेष्टा (ब) सत्कार (स) अजन्तः (द) हरिं वन्दे
(11) सत्व संधेः उदाहरणमस्ति।
(अ) सोऽत्र (ब) स इच्छति (स) धेनुर्धावति (द) शावकश्चलति
(12) 'स्वधा' इति पद योगे विभक्तिः भवति?
(अ) तृतीया (ब) पंचमी (स) चतुर्थी (द) षष्ठी
(13) 'धिक्' इति पद योगे विभक्ति भवति?
(अ) द्वितीया (ब) तृतीया (स) पंचमी (द) सप्तमी
(14) निष्कामः इत्यत्र पदे कः उपसर्गः?
(अ) निष् (ब) निस् (स) निश् (द) निर्
(15) 'आहरति' इत्यत्र उपसर्ग शब्दं च पृथक कृत्वा लिखत।
(अ) आ + हर (ब) आ + हरी (स) आ + हरती (द) आ + हरति
(16) गम् धातोः लृट् लकार रूपम् अस्ति?
(अ) गच्छति (ब) गमिच्छति (स) गमिष्यति (द) गमिछति
(17) कथमेकैकशो व्याघ्र भक्षणाय कलहं कुरूथः? रेखांकित पदे को धातुः?
(अ) कृ–धातुः (ब) क्र–धातुः (स) क्रि–धातुः (द) क्री–धातुः

प्रश्न 2. निर्देशानुसारं रिक्तस्थानानि पूरयत– (5)

(1) प्रकृतेः .................. दर्शनीया अस्ति। (रमणीय+तल्)
(2) अहं .................... न खादामि। (गम्+शतृ)
(3) तस्य माता .................... अस्ति। (चतुर्+टाप्)
(4) सः ...................... सह गच्छति।। (पितृ शब्दस्य तृतीया विभक्तिः एकवचनम्)
(5) .................... किं नाम अस्ति। (युष्मद् शब्दस्य षष्ठी एकवचनम्)

प्रश्न 3. अधोलिखित अपठितं गद्यांश पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशम् लिखत–

कल्याणाय हितं सत्यं भवति। यद् वस्तु यथा विद्यते तस्य तेन एव रूपेण कथनं लेखनं वा सत्यम् उच्यते। सत्येन एव समाजस्य स्थितिः भवति। यदि सर्वे असत्यवादिनः भवेयुः तदा लोकस्य स्थितिः क्षणमात्रम् अपि भवितुं न शक्नोति। एषा महिमा सत्यस्य एव अस्ति यद् वयं समाजे मनुष्येषु विश्वासं

कुर्मः। अतः सत्यम् एव लोकस्य आधारः अस्ति। समाजस्य सकलः कार्यव्यवहारः विश्वासेन चलति, विश्वासस्य आधारः सत्यमेव भवति। जीवनस्य सर्वेषु क्षेत्रेषु सत्यस्य अपेक्षा विद्यते। अस्माकं सकलम् आदानं प्रदानं च सत्ये एव अवलम्बितं भवति। राजनीतिक क्षेत्रे, सामाजिक क्षेत्रे, धार्मिक क्षेत्रे, आध्यात्मिक क्षेत्रे च सत्यस्य महती आवश्यकता वर्तते।

(क) एक पदेन उत्तरतः— (1×2=2)
(अ) सत्येन समाजस्य का भवति?
(ब) सत्यं कस्य आधारः अस्ति?

(ख) पूर्ण वाक्येन उत्तरत— (1×2=2)
(अ) किम् सत्यम् उच्यते?

(ग) अस्य गद्यांशस्य समुचित शीर्षकं लिखत। (1)

(घ) भाषिक कार्यम्:— (1×3=3)
(अ) कुर्मः इति क्रिया पदस्य गद्यांशे कर्तृपदं किम्?
(ब) 'कार्यव्यवहारः' इत्यस्य गद्यांशात् विशेषण पदं चित्वा लिखत।
(स) 'सर्वेषु' इति सर्वनामपदस्य संज्ञापदं किमस्ति?

(खण्ड—'ब')

प्रश्न 4. माता <u>पुत्राय</u> क्रुध्यति। रेखांकित पदे विभक्तिं तत्कारणं च लिखत। (2)

प्रश्न 5. अधोलिखितौ संख्यावाचि शब्दौ संस्कृतेन लिखत। (1+1=2)
(अ) 107 (ब) 551

प्रश्न 6. धेनूनाम् माता सुरभिः आसीत्? रेखांकित पदे प्रश्ननिर्माणं कुरूत। (2)

प्रश्न 7. अधोलिखित श्लोकस्य हिन्दी भाषायां सप्रसंग भावार्थ लिखतः— (2)
क्रोधो हि शत्रुः प्रथमो नराणां, देहस्थितो देहविनाशाय।
यथास्थितः काष्ठगतो हि वह्निः, स एव वह्निर्दहते शरीरम्।

प्रश्न 8. अधोलिखित श्लोकस्य अन्वयं मञ्जूषातः पदानि चित्वा पूरयत— (2)
(योजयते, प्रतिगृह्णाति, षड्विधम्, आख्यति)
ददाति प्रतिगृह्णाति, गुह्यमाख्याति पृच्छति।
भुङ्क्ते योजयते चैव षड्विधं प्रीतिलक्षणम्।।
अन्वयः— ददाति (1) .................. गुह्यम् (2) ...................... पृच्छति, भुङ्क्ते (3) ..................
च, प्रीतिलक्षणं (4) ................. एव (भवति)

प्रश्न 9. स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखत यद् अस्मिन् प्रश्नपत्रे न स्यात्। (2)

प्रश्न 10. "सौहार्द प्रकृतेः शोभा" इति पाठस्य सारं हिन्दी भाषायां लिखत। (2)

अथवा

"विचित्र साक्षी" इति पाठ सारं हिन्दी भाषायां लिखत।

(खण्ड—'स')

प्रश्न 11. अधोलिखितं गद्यांश पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखतः—
भो वासव ! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीनः इति जानन्नपि कृषकः तं बहुधा पीड्यति। सः कृच्छ्रेण भारमुद्वहति। इतरभिव धुरं वोढुं सः न शक्नोति। एतत् भवान् पश्चति न? "इति प्रत्यवोचत्।" भद्रे! नूनम् । सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेवं एतादृशं वासत्सल्यं कथम्?" इति इन्द्रेण पृष्टा सुरभिः प्रत्यवोचत्।

(क) एक पदेन उत्तरं लिखत— (2)
(अ) वृषभं कः बहुधा पीड़यति?

(ख) पूर्ण वाक्येन उत्तरतः— (2)
(अ) दुर्बलः वृषभः किं वोढुं न शक्नाति?

(ग) यथानिर्देशम् उत्तरं लिखतः— (1×2=2)
(अ) एतत् भवान् पश्यति न? 'अत्र' भवान् इति सर्वनाम पदं कस्मै प्रयुक्तम्?
(ब) "सहस्राधिकेषु" इति विशेषणस्य विशेष्य पदं किम्?

अथवा

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन स्वपुत्रं कस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रूग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीड़ितः स बसयानं विहाय पदातिरेव प्राचलत्।

पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् देरे आसीत्। निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा। एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः करूणापरो गृही तस्मै आश्रयं प्रायच्छत्।

(क) एक पदेन उत्तरं लिखत– (1×2=2)

(अ) निशान्धकारे प्रसृते कुत्र पदमात्रा न शुभावहा?

(ख) पूर्ण वाक्येन उत्तरतः– (2×1=2)

(अ) निर्धनः जनः किमर्थं व्याकुलो जातः?

(ग) यथानिर्देशम् उत्तरं लिखतः– (1×2=2)

(अ) "तेन स्वपुत्रं एकस्मिन् .................। अत्र 'तेन' इति सर्वनाम स्थाने संज्ञा पद प्रयोगं कुरूत।

(ब) "सः बसयानं विहाय पदातिरेव प्राचलत्" अत्र 'स' इति कर्त्तापदस्य क्रियापदं लिखत।

प्रश्न 12. अधोलिखित पद्यांश पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत–

महानगरमध्ये चलदनिशं कालायस चक्रं, मनः शोषयत्, तनुः पेषयद् भ्रमति सदा वक्रम्,
दुदन्तिर्दशनैरमुना स्यान्नैव जनग्रहसनम्, दुर्वहम् अत्र जीवितं जातं प्रकृति रेव शरणम्
शुचि–पर्यावरणम्।।

(क) एक पदेन उत्तरं लिखत– (1×2=2)

(अ) अत्र किं दुर्वहं जातम्?

(ख) पूर्ण वाक्येन उत्तरतः– (2×1=2)

(अ) महानगरमध्ये अनिशं किं चलाति?

(ग) यथानिर्देशम् उत्तरं लिखतः– (1×2=2)

(अ) "कालायसचक्रम्" इति कर्तृपदस्य क्रिया पदं किम्?

(ब) 'शुचि–पर्यावरणम्' इत्यत्र किं विशेष्य पदं?

अथवा

आलस्य हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा चं नावसीदति।।

(क) एक पदेन उत्तरं लिखत– (1×2=2)

(अ) मनुष्याणां शरीरस्थः महान् शत्रु कः?

(ख) पूर्ण वाक्येन उत्तरतः– (2×1=2)

(अ) आलस्यं मनुष्याणां कीदृशः रिपुः वर्तते?

(ग) यथानिर्देशम् उत्तरं लिखतः– (1×2=2)

(अ) 'कृत्वा यं नावसीदति' अत्र यम्' सर्वनाम् पदं कस्मै प्रयुक्तम्?

(ब) 'रिपुः इति विशेष्यस्य विशेषण पदं किम्।

प्रश्न 13. अधोलिखितं नाट्यांश पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखतः–

(एतस्मिन्नेव काले व्याघ्रचित्रकौ अपि नदीजलं पातुमागतौ एवं विवादं शृणुतः वदतः च)

व्याघ्रचित्रकौ – अरे किं वनराजपराय सुपात्र चीयते?

एतदर्थं तु आवामेव योग्यौ। यस्य कस्मापि चयनं कुर्वन्तु सर्वसम्मत्या।

सिंहः – तूष्णीं भव भोः। युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ। एते वन्यजीवाः भक्षकं रक्षकपदयोग्यं न मन्यन्ते। अतएव विचारविमर्शः प्रचलति।

बकः – सर्वथा सम्यगुक्तम् सिंह महोदयेन। वस्तुतः एव सिंहेन बहुकालपर्यन्तं शासनं कृतम् परमधुना तु कोऽपि पक्षी एव राजेति निश्चेतव्यम् अत्र तु संशीतिलेशस्यापि अवकाशः एव नास्ति।

(क) एक पदेन उत्तरं लिखत– (1×2=2)

(अ) नदीजलं पातुं कौ आगतौ?

(ख) पूर्ण वाक्येन उत्तरतः– (2×1=2)

(अ) वन्यजीवा, कम् रक्षकपदयोग्यं न मन्यन्ते?

(ग) यथानिर्देशम् उत्तरं लिखतः– (1×2=2)

(अ) 'आवामेव योग्यौ'। अत्र 'आवाम्' सर्वनाम् पदं काभ्यां प्रयुक्तम्?

(ब) 'मन्यन्ते' इति क्रियायाः कर्तृपदं किम्?

अथवा

(सिंहासनस्थः रामः। ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ)
विदूषकः – इत इत आयौ!
कुशलवौ – (रामस्य समीपम् उपसृत्य प्रणम्य च) अपि कुशलं महाराजस्य?
रामः – युष्मद् दर्शनात् कुशलमिव। भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम् एव, न पुनरतिथिजन समुचितस्य कण्ठाश्लेषस्य। (परिष्वज्य) अहो हृदयग्राही स्पर्शः।

(आसनार्धमुपवेशयति)

उभौ – राजासनं खल्वेतत्, न युक्तमध्यासितुम्।
रामः – सत्यवधानं न चारित्रलोपाय। तस्मादङ्क– व्यवहितमध्यास्यतां सिंहासनम्।

(अङ्कमुपवेशयति)

(क) एक पदेन उत्तरं लिखत– (1×2=2)
(अ) सिंहासनस्थः कः?
(ख) पूर्ण वाक्येन उत्तरतः– (2×1=2)
(अ) कुशलवौ किं कृत्वा रामस्य कुशलं पृच्छतः?
(ग) यथानिर्देशम् उत्तरं लिखतः– (1×2=2)
(अ) "युष्मद् दर्शनात्" अत्र 'युष्मत्' सर्वनाम पदं काभ्यां प्रयुक्तम्?
(ब) कुशलवौ इति कर्तृपदस्य क्रियापदं किम्।

प्रश्न 14. यथानिर्देशम् उत्तरं लिखतः–
(1) रथस्य पश्चात्। (समस्त पदं लिखत)
(2) रामकृष्णौ। (समास विग्रहपदं लिखत)
(3) चन्द्रमुखम्। (समासस्य नाम लिखत)

प्रश्न 15. मञ्जूषायाः प्रदत्तैः समुचितैः अत्ययपदैः वाक्यानि पूरयतः– (3)
(सर्वत्र, एकदा, कुत्रः)
(1) भवती अधुना ................ आगच्छति?
(2) ईश्वरः ................ व्यापकः अस्ति।
(3) सः .................... वनं गतवान्।

(खण्ड–'द')

प्रश्न 16. भवति राजकीय–उच्च–माध्यमिक–विद्यालय–चन्द्रपुरस्य दशम्याः कक्षायाः छात्रा रेवती अस्ति। भवती रूग्णा, अतः स्वप्रधानाचार्याय दिनद्वयस्य रूग्णतावकाशार्थं प्रार्थना पत्रं लिखतु। (4)

अथवा

भवान गौरव अस्ति, स्वकीय पितरं प्रति अध्ययन विषयो अधोलिखित पत्रं मञ्जूषापदसहायतया पूरयित्वा लिखत–
(परीक्षा, स्वास्थयमपि, प्रणतिः, पितृचरणेषु, स्नेहाआशिषः, शीघ्रमेव, वृत्तं, स्नेहापूरितं)

सीकरतः
दिनांक – 11–11–24

परमश्रद्धेयेषु (1) ................
सादरं प्रणतिः।
अत्र कुशलं तत्रास्तु।
भवदीयं (2) ................ पत्रं मया अद्यैव प्राप्तम्। पत्रं पठित्वा गृहस्य सर्वमपि (3) ............... ज्ञातवान्। अधुना मम अर्द्धवार्षिकी (4) ................. प्रचलति। अतोऽहमध्ययने दत्तचितोऽस्मि। (5) ................... समीचीनम्। परीक्षा नन्तरम् (6) .................. गृहं आगमिष्यामि।
पूज्यायाः मातुश्चरणयोः मम (7) ................ कथनीया, भगिन्यै गरिमायै (8) ..................।

भवदाज्ञाकारी पुत्रः
गौरवः

प्रश्न 17. अधः चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया संस्कृते अष्टवाक्यानि "स्वकक्षाविषये" रचयतुः– (4)
(मानचित्रम्, श्यामपट्टे, भित्तौ, शिक्षकः, वातावरणं, छात्राः, पुस्तकम्, दृश्यते)



अथवा

मञ्जूषातः उपयुक्तपदानि गृहीत्वा चिकित्सा–दर्शनम् इति विषये वार्तालाप पूरयत।

(गन्तुम्, अस्य, तुभ्यं, धूम्रपानं, स्वास्थ्य, प्रेरणीयाः, मया, दुर्व्यसनस्य)

सोहनः – गुरूवर ! अहं पश्यामि विद्यालय केचन छात्रा (1) ................ कुर्वन्ति।

गुरूः – वत्स ! धूम्रमानं (2) .................... विनाशकमस्ति।

सोहनः – गुरूवर! कोऽस्य (3) .................. निवारणोपायः?

गुरूः – पुत्र! ज्न–जागर्तिरेव (4) ................... दुर्व्यसनस्य निवारणोपायः।

सोहनः – गुरूवर! (5) ................ किं करणीयम्?

गुरूः – त्वया छात्राः (6) .............. यत् अस्माभिः धूम्रपानं न करणीयम्।

सोहनः – गुरूवर! एव मेव करोमि। अधुना अहं (7) ................ इच्छामि।

गुरूः – वत्स! महत्वपूर्ण विषयोपरि वार्ता कर्तु (8) ................. धन्यवादं ददामि।

प्रश्न 18. अधोलिखितेषु वाक्येषु केषाञ्चित् चतुर्ण्णा वाक्यानां संस्कृत भाषया अनुवादं कुरूत– (4)

(1) मित्र को दूध अच्छा लगता है। (2) हम सब नाटक देखते है।

(3) वह दुष्ट पर क्रोध करता है। (4) मोहन घोड़े से गिर पड़ा।

(5) रमेश सिंह से डरता है। (6) गोपाल कल आयेगा।

प्रश्न 19. अधोलिखित वाक्यानि क्रमरहितानि सहित। यथाक्रमं संयोजनं कृत्वा लिखतः– (3)

(1) बकः कलशात् चञ्चवा क्षीरोदनं खादति।

(2) बकः केवलं क्षीरोदनं पश्यति।

(3) श्रृगालः च केवलम् ईर्ष्यया पश्यति।

(4) कुटिलस्वभावः श्रृगालः स्थाल्यां बकाय क्षीरोदनं चच्छति।

(5) एकस्मिन् वने श्रृगालः बकः च निवसतः स्म।

(6) बकस्य निमन्त्रेण श्रृगालः प्रसन्न अभवत्।

अथवा

मञ्जूषायां प्रदत्तशब्दानां सहायतया "स्वस्थजीवनम्" इति विषये षट्–संस्कृतवाक्येषु एकम् अनुच्छेदं लिखत–

(प्रतिदिनम्, सूर्योदयः, संतुलितः आहारः, नियमितः, व्यायामः, स्वास्थयवर्धक)